International Journal of Sanskrit Research 2024; 10(5): 73-75

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(5): 73-75
© 2024 IJSR
www.anantaajournal.com
Received: 25-06-2024
Accepted: 28-07-2024

डॉ. नीलाम्बरबाघः
सहायकाचार्यः, साहित्यविभागः।
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहारः, पुरी, ओडिशा, भारत

Corresponding Author:
डॉ. नीलाम्बरबाघः
सहायकाचार्यः, साहित्यविभागः।
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहारः, पुरी, ओडिशा, भारत

# मुद्राराक्षसम्- एकमनुशीलनम्

**डॉ. नीलाम्बरबाघः**

**सारांश**
नाटककारेण विशाखदत्तेन प्रणीतं "मुद्राराक्षसम्" इति नाटकमेकमद्भूतं निर्माणम्। यद्यपि विषयेऽस्मिन् विदुषां दृष्टिकोणः परस्परं भिन्नः एव तथापि तस्मिन् नाटके विद्यमानाः केचित् अंशाः एतादृशाः सन्ति, ये खलु विद्वत्तल्लजानां मनांसि आकर्षयन्ति। एषः विशाखदत्तः मुद्राराक्षसम् इति नाटकं रचयित्वा नाट्यजगत् प्रति एकां नवीनां शैलीं प्रदत्तवान्। विषयेऽस्मिन् न कापि विप्रतिपत्तिः। एषः नाटककारः निरसं वस्तुविशेषं स्वीकृत्य तस्मिन् सरसवस्तु आविर्भावयति। एतदेव लेखकस्य प्रवीणतायाः बोधकः। लेखकः तादृशं कथावस्तु नाटके स्वीकरोति यत्र सरसतायाः सर्वथा अभावः दृश्यते। ऐतिहासिकैतिवृत्तत्वात् कविः कल्पनाकाशे उड्डयनं कर्तुं न शक्नोति। एतत् सत्यं यत्–अत्र न महाकविकालिदासस्य सरसकल्पना, न वा भवभूतेः पाषाणरोदनमिव करुणरसः, न च शुद्रकस्य जनसामान्ययोग्यः चञ्चलः व्यङ्ग्यरचना न वा भट्टनारायणस्यैव रणहुङ्कारस्य ध्वनिः। विशाखदत्तस्य पार्श्वे न नायिकायाः सौन्दर्यं न च प्रकृतेः कमनीयता, न वा युद्धस्य कृते युद्धक्षेत्रं, तथापि केवलं नाट्यप्रणयनकौशलमात्रेण सहृदयान् आकर्षयितुं उद्योतः सन् पूर्णरूपेण सफलो भवति।

**कूटशब्दः** विशाखदत्तः, मुद्राराक्षसम्, इतिवृत्तः, नवीनशैली, नीरसः, सरसः, नाट्यप्रणयनकौशलम्

## प्रस्तावना

"मुद्राराक्षसम्" इति नाटके दृश्यानुकूलशैल्यां परिवर्त्तनं तथा पात्राणाम् अनुकूलभावाभिव्यक्तिः अवलोक्यते। अस्मिन् नाटके यद्यपि अङ्गीरसः वीरः तथापि लेखकः यथास्थानम् अन्येषां रसानां परिपाकं सफलतया सम्पादयति। अत्र यद्यपि रणदुन्दुभिः न ताड्यते तथापि पात्राणां शब्दरूपकं दुन्दुभिः अवश्यं भृशं ताड्यते। तण्डुलपाकन्यायेन अवलोक्यते चेत् लेखकस्य दक्षता स्पष्टरुपेण दृष्टिपथमायाति। रौद्ररसेऽपि चाणक्यस्य उक्तिः – कः एषः मयि स्थिते चन्द्रगुप्तम् अभिभवितुमिच्छति वलात्।

"आश्वादिताद्विरद-शोणितशोणशोभां
सन्ध्यारुणामिवकलां शशलाञ्छनस्य।
जृम्भाविदारितमुखस्य मुखात् स्फुरन्तीं
को हर्त्तुमिच्छति हरेः परिभूय दंष्ट्राम्॥"[१]

स्वकीयं प्रतिज्ञापूर्त्तिं विवेचयन् चाणक्यः वीररसं इत्थम् अभिव्यञ्जयति यथा-

"आरुह्यारुढकोपस्फुरणविषमताग्राङ्गुलिमुक्तचूडाम्
लोकप्रत्यज्ञामुग्राम् सकलरिपुकूलोच्छेददीर्घां प्रतिज्ञाम्।
केनान्येनावलिप्ता नवनवतिशतद्रव्यकोटीश्वरास्ते-
नन्दाः पर्यायभूताः पशव इव हताः पश्यतो राक्षसस्य॥"[२]

मलयकेतोः सेनायाः वर्णनप्रसङ्गेऽपि एतादृशं वर्णनम् उपलभ्यते। राक्षसस्य उक्तौ वीररसस्य प्रतिच्छविः स्पष्टरुपेण अवलोक्यते। चन्दनदासस्य रक्षायै चेष्टितस्य राक्षसस्य उक्तिः—

"निस्त्रिंशोऽयं विगतजलदव्योमसङ्काशमूर्त्ति-
र्युद्धश्रद्धापुलकित इव प्राप्तसख्यः करेण।
सत्वोत्कर्षात् समरनिकषा दृष्टसारः परैर्मे
मित्रस्नेहाद्विवशमधुना साहसे मां नियुङ्क्ते॥"[३]

ओजगुणविशिष्टवर्णनायामपि कवेः चतुरा लेखनी प्रसादगुणधारां वहति । यथा उपायहीनराक्षसस्य उक्तिः –

"किं गच्छामि तपोवनं न तपसा शाम्येत वैरं मनः,
किं भर्तृननुयामि जीवति रिपौ स्त्रीणामियं योग्यता।
किं वा खड्गसखः पताम्यरिबले नेदं न युक्तं भवे-
च्चेतश्चन्दनदासमोक्षरभसं रुन्ध्यात् कृतघ्नं न चेत् ॥" [४]

वीररसवर्णनायां दक्षः नाटककारः शृङ्गाररसवर्णनायामपि तादृशः दक्षः । समयप्राप्ते सति सः शृङ्गाररसप्रवाहं प्रदर्शयति –
यथा-

"वामां बाहुलतां निवेश्य शिथिलं कण्ठे निवृत्तानना,
स्कन्धं दक्षिणया बलान्निहितयाऽप्यङ्गे पतन्त्या मुहुः।
गाढालिङ्गनसङ्गपीडितसुखं यस्योद्यमाशङ्किनी
मौर्यस्योरसि नाधुनाऽपि कुरुते वामेतरं श्री स्तनम् ॥" [५]

लेखकः यथा बाह्यचित्रणे निपुणः तादृशः दक्षः आन्तरिकभावाभिव्यक्तौऽपि।
यथा बाह्यचित्रणम्-

"धूर्तैरन्वीयमानाः स्फुटचतुरकथाकोविदैर्वेशनार्यो
नालङ्कुर्वन्ति रथ्याः पृथुजघनभराक्रान्तमन्दप्रयातैः ।
अन्योन्यं स्पर्द्धमाना न च गृहविभवैः स्वामिनो मुक्तशङ्काः,
साकं स्त्रीभिर्भजन्ते विधिमभिलषितं पार्वणं पौरमुख्याः ॥" [६]

मलयकेतुः यदा राक्षसस्य देशभक्तौ स्वामीभक्तौ वा सन्देहं करोति, दोषं पश्यति तदा राक्षसः वहु मानसिकी पीडाम् अनुभवन् वहु विषण्णः भवति। राक्षसस्य अन्तः पीडा इत्थं दृष्टिपथे आयाति।
यथा-
अहो विवेकशून्यता म्लेच्छस्य मलयकेतोः –

"यो नष्टानपि जीवनाशमधुना शुश्रूषते स्वामिन-
स्तेषां वैरिभिरक्षतः कथमसौ सन्धास्यते राक्षसः।
इत्थं वस्तुविवेकमूढमतिना म्लेच्छेन नालोचितं,
दैवेनोपहतस्य बुद्धिरथवा पूर्वं विपर्यस्यति ॥" [७]

नन्दस्य काले यद् उद्यानं हरित् पूर्णमासीत् तस्य नग्नरूपं चन्द्रगुप्तस्य शासन्काले दृष्ट्वा राक्षसः अत्यन्तः मर्माहतः भवति।
यथा-

"विपर्यस्तं सौधं कुलमिव महारम्भरचनं,
सरः शुष्कं साधोर्हृदयमिव नाशेन सुहृदाम्।
फलैर्हीना वृक्षा विगुणनृपयोगादिव नया-
स्तृणैश्छन्ना भूमिर्मतिरिव कुनीत्या ह्यविदुषः ॥" [८]

तुलनात्मकवर्णनायां श्लिष्टवर्णनायां च विशाखदत्तः सिद्धहस्तः आसीत्।
तुलनात्मकवर्णनं यथा- (चाणक्य-राक्षसयोः तुलनां कुर्वन् विराधगुप्तः- अहितुण्डिकः)

"कौटिल्यधीरज्जुनिबद्धमूर्ति मन्ये स्थिरां मौर्यकुलस्य लक्ष्मीम्।
उपायहस्तैरपि राक्षसेन विकृष्यमानामिव लक्षयामि ॥" [९]

तथा-

"विरुद्धयोर्भृशमिह मन्त्रिमुख्ययोर्महावने वनगजयोरिवान्तरे।
अनिश्चयाद् गजवशयेव भीतया गतागतैर्भृशमिव खिद्यते श्रिया ॥" [१०]

तेजस्वीनायकम् अतेजस्वीनायकञ्च आधारत्वेन स्वीकृत्य कार्यं कुर्वाणां तुलनात्मकं चित्रं
यथा-

"द्रव्यं जिगीषुरधिगम्य जडात्मनोऽपि
नेतुर्यशस्विनि पदे नियता प्रतिष्ठा।
अद्रव्यमेत्य तु विविक्तनयोऽपि
मन्त्री शीर्णाश्रयः पतति कूलजवृक्षवृत्या ॥" [११]

नाटके श्लिष्टचित्रणम्-
यथा- शरदृतोः शिवस्य च वर्णनम्-

"आकाशं काशपुष्पच्छविमभिभवता भस्मना शुक्लयन्ती,
शीतांशोरंशुजालैर्जलधरमलिनां क्लिन्दती कृत्तिमौभीम्।
कापालीमुद्वहन्ती स्रजमिव धवलां कौमुदीमित्यपूर्वा-
हासश्रीराजहंसा हरतु तनुरिव क्लेशमैशीं शरद्वः ॥" [१२]

शरदृतोः विष्णोः च वर्णनम्—

"प्रत्यग्रोन्मेषजिह्वा क्षणमनभिमुखी रत्नदीपप्रभाणाम्,
आत्मव्यापारगुर्वी जनितजललवा जृम्भितैः साङ्गभङ्गैः।
नागाङ्कं मोक्तुमिच्छोः शयनमुरुफणा चक्रवालोपधानं,
निद्राच्छेदाभिताम्रा चिरमवतु हरेदृष्टिराकेकरा वः ॥" [१३]

राजनीतिज्ञ- दार्शनिकयोः वर्णनम्-

"साध्ये निश्चितमन्वयेन घटितं विभ्रत् सपक्षे स्थितिं,
व्यावृत्तश्च विपक्षतो भवति यत् तत् साधनं सिद्धये।
तत् साध्यं स्वयमेव तुल्यमुभयोः पक्षे विरुद्धञ्च यत्,
तस्याङ्गीकरणेन वादिन इव स्यात्स्वामिनो निग्रहः ॥" [१४]

इत्थं नाटककारस्य तथा राजनीतिज्ञस्य वर्णनम् –

"कार्योपक्षेपमादौ तनुमपि रचयंस्तस्य विस्तारमिच्छन्,
बीजानां गर्भितानां फलमतिगहनं गूढमुद्भेदयंश्च।
कुर्वन् बुद्ध्या विमर्शं प्रसृतमपि पुनः संहरन् कार्यजातं,
कर्त्ता वा नाटकानामिमर्मनुभवति क्लेशमस्मद्विधो वा ॥" [१५]

तथा सूत्रधारस्य मुखेन नट्याः तथा चाणक्यनीतेः आह्वानं "गुणवत्युपायनिलये......." इत्यादि।
नाटककारः विशाखदत्तः यद्यपि प्रकृतिवर्णनायां स्वतन्त्रः नास्ति तथापि यथावसरं स्वल्पैः शब्दैः स्वस्य प्रकृतिप्रेम्णः उदात्तकल्पनाशीलतायाश्च अद्भुतोदाहरणं प्रस्तौति। शरत्वर्णनायां वैतालिकमुखेन शिव-विष्णोः व्याजेन प्रकृतिवर्णनं कृतमेव।
षष्ठेऽङ्के लेखकस्य प्रकृतिचित्रणे उत्प्रेक्षायाः पराकाष्ठा अवलोक्यते। यथा-
कुठारेण यदा वृक्षः कर्त्तितः भवति तथा वृक्षशाखाः यदा कर्त्तिताः भवन्ति तदा सः वृक्षः कपोतस्वरव्याजेन रूदनस्ति तथा वृक्षस्य क्रोडे वसमानः सर्पाः स्वाश्रयदातामित्रस्य क्षते व्रणमिव निर्मोकच्छेदैः निबघ्नन्ति।
यथा-

"क्षताङ्गानां तीक्ष्णैः परशुभिरुदग्रैः क्षितिरुहां,
रुजा कूजन्तीनामविरतकपोतोपरुदितैः।
स्वनिर्मोकच्छेदैः परिचितपरिक्लेशकृपया,
श्वसन्तः शाखायां व्रणमिव निबघ्नन्ति फणिनः ॥" [१६]

दुर्जनं राजनं त्यक्त्वा वृक्षोऽपि तपस्विनः इव श्मशानभूमिं प्रति गम्यमानोऽस्ति।

यथा-

"अन्तः शरीरपरिशोष्मुपाश्रयन्तः,
कीटक्षतिस्रुतिभिरस्रमिवोद्वमन्तः।
छाया वियोगमलिना व्यसने निमग्ना,
वृक्षाः श्मशानमुपगन्तुमिव प्रवृत्ताः ॥"[१७]

**उपसंहारः**

सारतया इत्थं वक्तुं शक्यते यत्- नाटककारः विशाखदत्तः कुशलनाटककारः सफलः राजनीतिज्ञः, विविधशास्त्रदक्षः तथा सर्वविधचित्रणकुशलः आसीत् । तस्य "मुद्राराक्षसम्" इति नाटकम् संस्कृतसाहित्यकोशे मुक्तामणि-सदृशोऽस्ति। यत् खलु प्राचीनपरम्परायाः भिन्नं, नवीनमार्गस्य संस्थापकञ्च वर्त्तते। नाटकमिदं भित्तिं विना चित्रं तथा विनाधारं सौधमपि सहृदयहृदयाह्लादकं तथा चिरस्थायी वर्त्तते।

**पाददिप्पणी**

1. मुद्राराक्षसम्- १/८
2. तत्रैव- ३/२७
3. तत्रैव-६/१९
4. तत्रैव-५/२४
5. तत्रैव-२/१२
6. तत्रैव-३/१०
7. तत्रैव-६/८
8. तत्रैव-६/११
9. तत्रैव-२/२
10. तत्रैव-२/३
11. तत्रैव-७/१४
12. तत्रैव-३/२०
13. तत्रैव-३/२१
14. तत्रैव-५/१०
15. तत्रैव-४/३
16. तत्रैव-६/१२
17. तत्रैव-६/१३